


# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्

Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

ख्रैस्ताब्दः २०२१ | वैक्रमाब्दः २०७८ | अङ्कः २८ | अप्रैल-जून २०२१

## कुलपतिवाक्



आत्मीयमित्राणि,

"सोमज्योति"रित्याख्ये रम्ये उपवने नवीनप्रसूनरूपेण प्रकाश्यमानस्य अङ्कविशेषस्य अवसरेऽस्मिन् समेषां भवतां भवतीनां च कृते हार्दम् अभिनन्दनं व्याह्रियते।

उच्चशिक्षायाः मानदण्डः संशोधनमिति जानीमो वयम् । शोधनं शुद्धिः शोधः इत्येतेषु पदेषु सत्सु "समि"त्युपसर्ग-पूर्वकस्य "संशोधन" इत्याख्यस्य सिद्धिः प्रयोगश्च किमपि विशिष्टं महत्त्वं दर्शयन्निव प्रवर्तते । यथा सामान्यतः शोधितं परिष्कृतं च जलम् अस्माभिः पीयते । कदाचित् यन्त्रविशेषेण पुनरपि शोधनं विधीयते । इंग्लैण्डदेशे कथ्यते-यत् जलं भवान् पिबति तत् जलं भवतः प्राक् सप्तभिः जनैः पीतम् अस्तीति । अर्थात् दशवारं तस्य जलस्य संशोधनं विहितमस्ति, अन्ततः एतत् सार्वजनिकतया सर्वैरपि पातुं योग्यमिति प्रमाणीकृतमस्ति इति भावः । एतदस्ति संशोधनम् अर्थात् यस्यानन्तरं सर्वैरपि सामान्यैः जनैः तस्य उपयोगं प्रयोगः वा कर्तुं तत्र योग्यता आहिता जातेति निश्चयः स्यात् । यद्यपि किमपि संशोधनं पूर्णमन्तिमं वा न भवति, तत्र अग्रेऽपि तद्विषये संशोधनान्तरस्य सम्भाव्यत्वात्, तथापि यदिदानीं क्रियमाणमस्ति तत्तु उपलब्धोपलभ्यमानान्यतरप्रमाणजातैः पूर्णताप्रतिरूपं स्यादिति यत्नः संशोधकेनावश्यं विधातव्यः । तत्र च संशोधनकर्मणि "नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते" इति रघुवंशसञ्जीवन्यां मल्लिनाथकवेर्वचनमनुसर्तव्यम् ।

यथा मूलस्य रक्षणेनाश्रयेण च शाखासु पर्णेषु पुष्पेषु फलेषु च जीवत्तत्त्वं रसो वा स्थायित्वं नैरन्तर्यं चाप्नोति, तथैव वेदादिशास्त्रेषु विविधेषु काव्यादिषु च या भारतीयज्ञानपरम्परा सन्निहिता विद्यते तत्संशोधनावसरे मूलसूत्रभाष्यादिग्रन्थाः आश्रीयन्ते चेत् तज्ज्ञाननिधेः सुतरां परिचयः तथा च तद्गततत्त्वानां द्वारा ज्ञानाभिवर्धनेन सह प्रयोगकौशलमप्यभिवर्धेत, किं च तेन आधुनिककाले तेषाम् उपयोगेन सर्वेषां कल्याणं साधयितुं शक्येत । नवीनराष्ट्रियशिक्षानीति-२०२० इत्यस्यामपि भारतीयज्ञानपरम्परायाः (Indian Knowledge System) एवम्प्रकारेण संरक्षणं संवर्धनं किं च साम्प्रतिकः उपयोगः सुतराम् अभीष्टो विद्यते ।

"सोमज्योतिः" उपर्युक्तसंशोधनकर्मणि एवं च तद्द्वारा भारतीयज्ञानपरम्परायाः संस्कृतवाङ्मयनिष्ठा वर्तते, तस्याः नवीनराष्ट्रिय-शिक्षानीत्यनुसारं प्रयोगम् उपलक्ष्य स्वे स्वे कर्मण्यभिरतानां परमनिष्ठया निरन्तरं यतमानानाम् आचार्याणाम्, स्वस्वाभ्यासक्रममुखेन किं च तदतिरिक्तनानाविधकौशलविकासमुखेन छात्राणां तथा च तत्सम्पोषकरूपेण सर्वेषां पदाधिकारिणां कर्मचारिणाम् अस्मिन्नवसरे हार्दम् अभिनन्दनं पुरस्क्रियते ।

एतस्मात् २०२१-२२ शैक्षणिकसत्रात् शास्त्री-शिक्षाशास्त्री (संस्कृतम्) ४ वर्षीयस्पन्दात्मकः (4 Years B.A. B.Ed. (Sanskrit) Integrated Innovative) अभ्यासक्रमः विश्वविद्यालयपरिसरान्तर्गतमहाविद्यालये प्रारभ्यते । एम्.ए. (सामान्यं संस्कृतम्) किं च एम्.ए. (हिन्दु-अध्ययनम्) इति नवीनाभ्यासक्रमद्वयम् एतस्मात् वर्षात् प्रारभ्यते, यत्र अनधीतसंस्कृतविषयः स्नातकः प्रवेष्टुं योग्योऽस्ति । शास्त्रिकक्ष्यायां आचार्यकक्ष्यायां च अभ्यासक्रमेषु अपेक्षितं संशोधनं नवीनराष्ट्रियशिक्षानीतिं पुरस्कृत्य विहितमस्ति । तदतिरिच्य उभयत्र शास्त्रि-आचार्यकक्ष्ययोः अभ्यासक्रमे प्रतिवर्षं ५० अङ्कानां सरलमानकसंस्कृतेन लघुशोधपरियोजना सर्वैरपि छात्रैः प्रस्तोतव्या इति निश्चयः स्वीकृतोऽस्ति, येन प्रथमतः एव छात्रेषु संशोधनप्रवृत्तिः समागच्छेत् ।

"सोमज्योतिः" इत्येतस्य आधुनिकाङ्कस्य मान्यसम्पादकमण्डलस्य सर्वेषां सदस्यानां कृते हार्दाः शुभाशयाः ।

(प्रो. गोपबन्धु मिश्र)
कुलपतिः

प्रधानसम्पादकः
प्रो. गोपबन्धु मिश्रः
कुलपतिः

प्रकाशकः
डॉ. दशरथ जादवः
कुलसचिवः

प्रबन्धसम्पादकः
श्री रवीन्द्र एस. काले
ग्रन्थपालः

सम्पादकाः
डॉ. नरेन्द्रकुमार एल. पण्ड्या
डॉ. ललितकुमार ए. पटेलः
डॉ. दीपेश विनोद कतिरा
डॉ. जानकीशरण आचार्यः
श्री जिगर भट्टः

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist Gir Somnath, Gujarat - 362 266.
(O) 02876 - 244532
E-mai: editor.somjyoti@sssu.ac.in

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि ''सोमज्योतिः'' द्रष्टुं शक्यते - www.sssu.ac.in

Statement about the ownership and other particulars about newspapers

**SOMAJYOTIḤ**

FORM IV

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : Jalaram Graphics & Offset
   Nationality : Indian
   Address : Behind Hotel Kaveri, Veraval-362266
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

# कुलपतेः दैनन्दिनी

०६-०४-२०२१ परीक्षासमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः

०७-०४-२०२१ संवेदनशीलसमाजस्य कृते संस्कृतसाहित्यस्य भूमिका इति विषये ललितनारायणविश्वविद्यालयेन आयोजिते कार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः

०८-०४-२०२१ भवननिर्माणसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः

०९-०४-२०२१ मार्गदर्शनसमितेः पूर्वच्छात्रसङ्घस्य च उपवेशने अध्यक्षत्वेन उपस्थितिः

१४-०४-२०२१ 95th National Vice Chancellors' Meet & National Seminar of Vice Chancellors on Implementing National Education Policy-2020 to Transform Higher Education in India, BAOU, (Online)

२०-०४-२०२१ श्रीमद्भगवद्गीता की प्रासङ्गिकता इति विषये राणी-दुर्गावती-विश्वविद्यालयेन आयोजिते कार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः

२२-०४-२०२१ "संस्कृतशास्त्र एवं काव्य साहित्य में अनुसन्धान की दिशाएँ एवं प्रविधियाँ" इति विषये गुजरात-राष्ट्रिय-विधि-विश्वविद्यालयस्य कार्यक्रमे वक्तृत्वेन उपस्थितिः

२४-०४-२०२१ सारङ्गपुर-महाविद्यालये संस्कृतपाठनकार्यक्रमे अध्यक्षत्वेन उपस्थितिः

२६-०४-२०२१ संशोधनसमितेः, महिलासशक्तीकरणसमितेः, प्रकाशनसमितेः च उपवेशने अध्यक्षत्वेन उपस्थितिः

२७-०४-२०२१ 'कोरोना रसीकरण अभियानम्' इत्यन्तर्गतं शिक्षणमन्त्रिणः कार्यक्रमे उपस्थितिः

२८-०४-२०२१ गुजरात संस्कृत बॉर्ड इत्यस्य उपवेशने उपस्थितिः

२८-०४-२०२१ एम्.ए. इन हिन्दु स्टडीज इति अभ्यासक्रमसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः

२९-०४-२०२१ विश्वविद्यालयस्य शैक्षणिकपरिषदः कार्यकारिणीपरिषदश्च उपवेशने अध्यक्षत्वेन उपस्थितिः

३०-०४-२०२१ ग्रन्थालयसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः

०४-०५-२०२१ श्री के.का.शास्त्री पाक्षिक- व्याख्यानमालायाम् अध्यक्षत्वेन उपस्थितिः ("स स्थाणुः स्थिर-भक्ति-योग-सुलभः, मुख्यवक्ता - प्रो.गङ्गाधरपण्डा)

०७-०५-२०२१ एम्.ए. जनरल इन हिन्दू स्टडीज इत्यस्य उपवेशने अध्यक्षत्वेन उपस्थितिः

१०-०५-२०२१ कोविड-१९ संदर्भे परीक्षामार्गदर्शन कोरोना- टीकाकरणमार्गदर्शनं च इति कार्यक्रमे अध्यक्षत्वेन उपस्थितिः

११-०५-२०२१ अकथितं किञ्चित् इति पुस्तकसन्दर्भे लेखकेन सह मिलामः कार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः

११-०५-२०२१ प्रचारार्थं जनपदानां प्रतिनिधिभिः अध्यापकैः च सह आभासीय-सम्मेलनम्

१४-०५-२०२१ कानपुरविश्वविद्यालयस्य अभ्यासक्रमसमितौ सदस्यत्वेन उपस्थितिः

१८-०५-२०२१ शोधज्योतिषः लोकार्पणकार्यक्रमे अध्यक्षत्वेन उपस्थितिः

२१-०५-२०२१ आम्बेडकर ओपन युनिवर्सिटी इत्यत्र मासिकव्याख्यानमालाविमर्शे अध्यक्षत्वेन उपस्थितिः

०१-०६-२०२१ शिक्षणमन्त्रिणा सह वार्षिकायोजनसन्दर्भे उपवेशनम्

०७-०६-२०२१ विश्वविद्यालयस्य सङ्कायानाम् उपवेशने अध्यक्षत्वेन उपस्थितिः

०८-०६-२०२१ भवननिर्माणसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः, शलाकापरीक्षोत्तीर्णानां गोष्ठ्याम् उपस्थितिः

१३-०६-२०२१ "संस्कृतशौर्यम्" आचार्यरेवाप्रसादद्विवेदिनः श्रद्धाञ्जलिसभायाम् उपस्थितिः

१४-०६-२०२१ "ऋषिप्रज्ञा" ग्रन्थलोकार्पणकार्यक्रमे तथा च प्रो.देवेन्द्रनाथपाण्डेयस्य वर्धापनकार्यक्रमे अध्यक्षत्वेन उपस्थितिः

१९-०६-२०२१ भावनगर-गीरसोमनाथजनपदयोः संस्कृतशिक्षकाणां सम्भाषणवर्गस्य उद्घाटने मुख्यातिथित्वेन उपस्थितिः

२०-०६-२०२१ सोमनाथन्यासद्वारा आयोजिते सोमनाथपदकसमारोहे मुख्यवक्तृत्वेन उपस्थितिः

२१-०६-२०२१ अन्ताराष्ट्रिययोगदिवसस्य आभासीयकार्यक्रमे अध्यक्षत्वेन उपस्थितिः

२२-०६-२०२१ माननीयराज्यपालवर्येण सह नूतनशिक्षानीतेः उपवेशने उपस्थितिः

२३-०६-२०२१ के.का.शास्त्री-व्याख्यानमालायाम् अध्यक्षत्वेन उपस्थितिः (स्थायिभावों का स्थायित्व : एक विश्लेषण - प्रो.वेम्पटी कुटुम्बशास्त्री)

२४-०६-२०२१ कार्यकारिण्याः परिषदः उपवेशने, भवननिर्माणसमितेः च उपवेशने अध्यक्षत्वेन उपस्थितिः

२७-०६-२०२१ संस्कृतभारत्याः विद्वत्परिषदः आभासीयोपवेशने उपस्थितिः

३०-०६-२०२१ भावनगर-गीरसोमनाथजनपदयोः संस्कृतशिक्षकाणां सम्भाषणवर्गस्य समापनकार्यक्रमे मुख्यातिथित्वेन उपस्थितिः




श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राशासनिकं भवनम्

# श्री के. का. शास्त्री पाक्षिकव्याख्यानमाला


जनानां ज्ञानवर्धनाय कोरोनाकाले श्रीसोमनाथसंस्कृतविश्वविद्यालयः विविधान् कार्यक्रमान् ओनलाइनमाध्यमेन समायोजयति। एतेषु कार्यक्रमेषु 'श्री के. का. शास्त्रिपाक्षिकव्याख्यानमाला' इति कार्यक्रमः एको विशिष्टः उपक्रमो वर्तते। श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ४/०५/२०२१ दिनाङ्के श्री के. का.शास्त्री-पाक्षिक-व्याख्यानमालायाः नवमं व्याख्यानम् आयोजितम्। व्याख्यानस्य मुख्यवक्ता प्रो. गङ्गाधर- पण्डा (माननीयः कुलपतिः, कोल्हान युनिवर्सिटी चाईबासा, झारखण्ड) उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धु-मिश्रः आसीत्। कार्यक्रमस्य आरम्भे अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः महानुभावानां परिचयं प्रदाय स्वागतम् अकरोत्। ततश्च मुख्यः वक्ता श्रीमान् प्रो. गङ्गाधरः पण्डा "स स्थाणुः स्थिर-भक्ति-योग-सुलभः" इति विषये व्याख्यानम् अकरोत्। व्याख्यानान्ते कार्यक्रमस्य अध्यक्षः प्रो.गोपबन्धु-मिश्र-महोदयः आध्यक्षीयम् उद्बोधनम् अकरोत्। अन्ते वेदविभागस्य अध्यापकः श्रीविपुलभाई जादवः कृतज्ञताज्ञापनम् अकरोत्। पूर्णतामन्त्रेण अयं कार्यक्रमः समाप्तो जातः। अस्य व्याख्यानस्य आयोजनम् ओनलाइन वेबेक्स-माध्यमेन कृतमासीत्। तत्र विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः छात्राश्च उपस्थिताः भूत्वा व्याख्यानेन लाभान्विताः अभवन्। फेसबुक-माध्यमेनापि अनेके सामाजिकाः इमं कार्यक्रमम् अवलोकितवन्तः।


एतस्यामेव व्याख्यानमालायां दशमव्याख्यानं 23/06/2021तमे दिनाङ्के सायं 05 वादने आयोजितम् । अत्र मुख्यवक्तृरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राक्तनकुलपतयः भारतवर्षस्य सुनामधन्याः विद्वांसः प्रो. वेम्पटी कुटुम्बशास्त्रिमहोदयाः जालपुटमाध्यमेन उपस्थाय “स्थायिभावों का स्थायित्व - एक विश्लेषण” इति विषये वैदुष्यपूर्णं व्याख्यानम् अकुर्वन् । अस्य कार्यक्रमस्य आध्यक्ष्यं समलङ्कृतवन्तः आसन् – विश्वविद्यालयस्य कुलपतयः प्रो॰ गोपबन्धुमिश्रमहाभागाः। कार्यक्रमस्य शुभारम्भः डॉ. शत्रुघ्नपाणिग्राहिमहोदयेन वैदिकमङ्गलाचरणेन कृतः। अनन्तरं विराजतां सर्वेषां महानुभावानां परिचयपूर्वकं स्वागतं वचसा अनुस्नातकविभागाध्यक्षाः डॉ॰ ललितकुमारपटेलवर्य्याः अकार्षुः। अन्ते चोपस्थितानां सर्वेषां कार्त्तज्ञ्यं प्रो॰ विनोदकुमारझामहोदयाः प्रकटितवन्तः। अस्य ओनलाइन-कार्य्यक्रमस्य सञ्चालनं ज्योतिषप्राध्यापिका सुश्रीअपूर्वा अग्रवाल कृतवती । अस्मिन् कार्यक्रमे सर्वे अपि आचार्याः, सहाचार्याः, सहायकाचार्याश्चोपस्थिताः आसन्। अस्य लाईवप्रसारणमपि फेसबुकमध्ये जातम्। पूर्णतामन्त्रेण कार्यक्रमस्य समापनमभूत्। अस्याः व्याख्यानमालायाः संयोजकरूपेण डॉ.शत्रुघ्नपाणिग्राही श्रीविपुलः जादवः च वर्तेते।






व्याख्यानमालाकार्यक्रमे भाषमाणाः प्रो. वेम्पटी कुटुम्बशास्त्रिमहाभागाः, अध्यरूपेण उपस्थिताः कुलपतिमहाभागाः प्रो. गोपबन्धुमिश्राः






आभासीयकार्यक्रमे उपस्थिताः श्रोतारः


# आभासीयरीत्या प्राच्यच्छात्राणां सम्मेलनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राच्यच्छात्राणां सम्मेलनम् आभासीयरीत्या २८/०६/२०२१ तमे दिनाङ्के सायं ७.३० वादने आयोजितम्। एतस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः अध्यक्षत्वेन उपस्थितः आसीत्। कुलसचिवः डॉ. दशरथः जादवः, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, विश्वविद्यालयस्य सर्वे अध्यापकाः, पूर्वच्छात्राः वर्तमानच्छात्राः च अस्मिन् अवसरे आभासीयरीत्या उपस्थिताः अभवन्। कार्यक्रमस्य आरम्भे छात्रः दवे नीलः मङ्गलाचरणम् अकरोत्। अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः उपस्थितानां सर्वेषां स्वागतं प्रास्ताविकं च अकरोत्। विश्वविद्यालयस्य प्राच्यच्छात्रः तथा च साहित्यविभागस्य अध्यापकः श्रीजिगरभाई भट्टः वार्षिकं वृत्तं प्रस्तूय, पूर्वच्छात्रत्वेन छात्राणां भूमिकाम् उक्तवान्।

अस्मिन्नवसरे विश्वविद्यालयस्य पूर्वच्छात्राः जयः दवे, प्रकाशरंजनः मिश्रः, उत्तमः शुक्लः च स्वप्रतिभावं प्रकटय्य विश्वविद्यालयं प्रति समर्पणभावं प्रकटितवन्तः। विश्वविद्यालयद्वारा सञ्चालितस्य महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या शास्त्रप्रमाणैः सह छात्राणां कर्तव्याकर्तव्यवचनानि प्रोक्तवान्। कुलसचिवः डॉ. दशरथः जादवः आभासीयरीत्या छात्रैः मिलित्वा आनन्दम् अन्वभवत् , छात्रान् च उदबोधयत्। कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः छात्राणां मार्गदर्शनम् अकरोत्। विश्वविद्यालयस्य छात्राः समाजे विविधेषु क्षेत्रेषु सेवारताः सन्ति इति हर्षस्य विषयः तेन उद्गीरितः। उत्तमसमाजस्य निर्माणाय श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राणां महती भूमिका अस्ति, छात्राः तदर्थं सिद्धाः भवेयुः इति तैः उक्तम्।

कार्यक्रमस्य अन्ते पुराणविभागस्य अध्यापकः डॉ. पंकजकुमारः रावलः धन्यवादज्ञापनम् अकरोत्। कल्याणमन्त्रेण अस्य कार्यक्रमस्य पूर्तिः विहिता। अस्य कार्यक्रमस्य आयोजनं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राच्यच्छात्रसङ्घद्वारा अक्रियत। विश्वविद्यालयस्य प्राच्यच्छात्रः, केन्द्रियसंस्कृतविश्वविद्यालयस्य शोधच्छात्रः श्रीमान् अरुणः पाण्डेयः कार्यक्रमस्य सञ्चालनम् अकरोत्। अस्य कार्यक्रमस्य आयोजनं वेबेक्स द्वारा कृतमासीत् , यत्र शताधिकं छात्राः संलग्नाः आसन्। फेसबुक माध्यमेनापि अयं कार्यक्रमः अनेकैः वीक्षितः।




## 'महिला सशक्तीकरण हेतु सर्वकारीय योजनाएँ' इति व्याख्यानम्

महिलाधिकारसमित्या छात्राणामुपकाराय 26/04/2021 तमे दिनाङ्के सोमवासरे चतुर्वादनतः पञ्चवादनपर्य्यन्तं 'महिला सशक्तीकरण हेतु सर्वकारीय योजनाएँ' इति आधुनिकसमाजोपयोगिविषयमादाय एकं व्याख्यानं समायोजितम्, अस्य प्रसारणं फेसबुकमाध्यमेनाऽपि कृतम्। कार्य्यक्रमेऽस्मिन् मान्याः कुलपतिवर्य्याः प्रो. गोपबन्धुमिश्रमहोदयाः आध्यक्ष्यमूढवन्तः एवञ्च उद्बोधिकाः आसन् – डॉ॰ निशाबेनगोहिलमहोदयाः। तथा च कुलसचिवाः डॉ. दशरथजादवमहोदयाः, अनुस्नातकविभागाध्यक्षाः डॉ॰ ललितकुमारपटेलवर्य्याः, महाविद्यालयस्य प्राचार्य्याः पण्ड्यावर्य्याः, वेदविभागस्य आचार्य्याः प्रो. देवेन्द्रनाथपाण्डेयवर्य्याः, महिलाधिकारसमितेः अध्यक्षाः प्रो॰ अर्चनाकुमारीदुबेमहाभागाः, अन्याः अपि सदस्याः, विश्वविद्यालयस्य सर्वेऽपि आचार्य्याः, छात्राश्च संलग्नाः आसन्। कार्य्यक्रमस्यारम्भे वैदिकपरम्परानुगुणं मङ्गलं दर्शनविभागस्य सहायकाचार्यया डॉ. उमामहेश्वरीमहाभागयाचरितम्। कार्य्यक्रमेऽस्मिन्नुपस्थितानां परिचयपुरस्सरं स्वागतं अनुस्नातकविभागस्य अध्यक्षैः डॉ. ललितकुमारपटेलवर्य्यैः अकारि। ततः परं मुख्यवक्त्रीणां डॉ. निशाबेनगोहिलवर्य्याणामुद्बोधनं सञ्जातम्। महिलानां कृते सर्वकारस्य योजनानां विस्तरेण परिचयः, तत्स्वरूपञ्च सुष्ठु प्रचोदितम्। उद्बोधनानन्तरमध्यक्षीयवचोभिः कुलपतीनां मार्गदर्शनं लब्धम्। योजनानां विषये समये समये समाजे जागर्त्यभियानमपि सर्वकारेण कारयेत् इति उदीरितवन्तः। कार्य्यक्रमस्यान्ते धन्यतावचांसि ज्योतिषविभागस्य सहायिकाचार्या सुश्रीअपूर्वा अग्रवालमहोदयाविष्कृतवती। पूर्णतामन्त्रेण कार्य्यक्रमोऽयं सम्पन्नः। अस्य कार्य्यक्रमस्य सञ्चालनं योगविभागस्य प्राध्यापिका सुश्रीदृष्टिबेनबारैयावर्य्याकार्षीत्।

## विश्वयोगदिवसमुपलक्ष्य योगशिबिरम्




श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विश्वयोग-दिवसम् उपलक्ष्य सप्तदिनात्मकस्य ओनलाइन योगशिबिरस्य आयोजनम् अक्रियत। अस्य आरम्भः १४/०६/२०२१ तमे दिनाङ्के अभवत्। २०/०६/२०२१ तमं दिनाङ्कं यावत् प्रतिदिनं सायं ०५ वादनतः ०६ वादनं यावत् एतत् योगशिबिरम् अभवत्। शिबिरे अस्मिन् त्रीणि दिनानि डॉ. जयेशः मुंगरा तथा च चत्वारि दिनानि दृष्टिः बारैया मार्गदर्शनम् अकरोत्। अस्य शिबिरस्य संयोजकत्वेन अपि एतौ द्वौ कार्यम् अकुरुताम्। एतस्य शिबिरस्य सर्वाणि व्याख्यानानि विश्वविद्यालयस्य फेसबुक जालपुटे उपलब्धानि सन्ति।




## अन्ताराष्ट्रियः योगदिवसः


श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विश्वयोगदिवसम् उपलक्ष्य २१/०६/२०२१ तमे दिनाङ्के ओनलाइन कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे डॉ. जयेशः मुंगरा मङ्गलाचरणम् अकरोत्। ततः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः उपस्थितानां स्वागतम् अकरोत्। कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः अस्मिन् अवसरे योगस्य महत्त्वं विज्ञाप्य सर्वेभ्यः योगदिनस्य शुभकामनाः प्रादात्। डॉ. जयेशः मुंगरा योगस्य नियमान् विज्ञाप्य योगाभ्यासम् अकारयत्। योगदिवसस्य अस्य कार्यक्रमस्य कृतज्ञताज्ञापनं माननीयः कुलसचिवः डॉ. दशरथः जादवः अकरोत्। कार्यक्रमे अस्मिन् विश्वविद्यालयस्य अध्यापकाः कर्मचारिणः च उपस्थिताः आसन्। सर्वैः स्वगृहे स्थित्वा योगासनानि प्राणायामश्च आचर्यत। कार्यक्रमस्य सञ्चालनं दृष्टिः बारैया अकरोत्। सम्पूर्णकार्यक्रमस्य संयोजकत्वेन डॉ. जयेशः मुंगरा तथा दृष्टिः बारैया कार्यम् अकुरुताम्।



# 'कोविड-१९' सन्दर्भे परीक्षामार्गदर्शनं तथा च कोरोनारोगमुक्तिविषये जागृतिः' इति कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एन.एस.एस.विभागेन 'कोविड-१९'सन्दर्भे परीक्षामार्गदर्शनं तथा च कोरोनारोगमुक्तिविषये जागृतिः' इति कार्यक्रमस्य आयोजनम् १०/५/२०२१ तमे दिनाङ्के कृतमासीत्। यस्मिन् मुख्यप्रवक्तृरूपेण डॉ. कमलेशः उपाध्यायमहोदयः (प्राध्यापकः एवं डीन औषधविभागः, बी.जे.वैद्यकीयमहाविद्यालयः एवं च सिविल होस्पिटल-कर्णाव) एषः महोदयः वर्तमानपरिस्थितौ कोरोनासमये रोगनिवारणनियमपालनेन एवं जागृत्या एव कोरोनां जेतुं शक्नुमः तदुद्बोधितवान्। कोरोना समये किं किं ध्यातव्यं, केषु विषयेषु बोधः भवेत्, कीदृशी जागृतिरनिवार्या तत्सर्वं कार्यक्रमे सर्वेभ्यः सरलशैल्या ज्ञानं दत्तवान् एवं सर्वेषां प्रश्नानाम् उत्तमतया समाधानम् अददत्। कार्यक्रमस्य अध्यक्षरूपेण माननीयः प्रो. गोपबन्धुमिश्रमहोदयः आसीत्। रोगाक्रान्ते काले विद्यार्थिभ्यः परीक्षाविषये मार्गदर्शनस्यावश्यकता आसीत् तस्मिन् विषये सुचारुतया समाधानं दत्तम्। कुलसचिवः दशरथजादवेनापि प्रसङ्गोचितम् उद्बोधनं कृतम्। स्वागतं परिचयविधिं च अनुस्नातकविगाभाध्यक्षः डॉ. ललितकुमारपटेलमहोदयः कृतवान्। कार्यक्रमस्यान्ते आचार्यश्री डॉ. नरेन्द्रकुमारपण्ड्यामहोदयेन आभारविधिः कृतः। कार्यक्रमस्य सञ्चालनं डॉ. श्रीपङ्कजकुमार रावलमहोदयेन कृतम्।कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य विद्यापरिषत्सभ्याः, सङ्कुलस्य अध्यापकाः, विश्वविद्यालयस्य महाविद्यालयानां प्राचार्याः, प्राध्यापकाः, विद्यार्थिनः, प्राच्यछात्राः, एवञ्चाहत्य २०००(द्विसहस्त्र) जनाः वेबेक्ष एवं फेसबुकमाध्यमेन सम्मिलिताः जाताः आसान्। कार्यक्रमस्य संयोजकरूपेण एन. एस. एस. प्रोग्राम को.ओर्डिनेटर डॉ. जे.डी.मुंगरामहोदयः एवं च एन.एस.एस. प्रोग्राम ओफिसर डॉ. पंकजकुमार रावलमहोदयः कार्यं कृतवान्।






**શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી એન.એસ.એસ. વિભાગ દ્વારા ×કોવિડ-૧૯ ના સંદર્ભમાં પરીક્ષા માર્ગદર્શન અને કોરોના રસીકરણ (વેક્સિનેશન) અંગે જાગૃતતા કાર્યક્રમ**

(નિલેશ ચાવડા દ્વારા)

વેરાવળ તા.૧૨

શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી એન.એસ.એસ. વિભાગ દ્વારા ×કોવિડ-૧૯ ના સંદર્ભમાં પરીક્ષા માર્ગદર્શન અને કોરોના રસીકરણ (વેક્સિનેશન) અંગે જાગૃતતા કાર્યક્રમ× નું આયોજન તારીખ - ૧૦/૫/ ૨૦૨૧ ના રોજ કરવામાં આવ્યું હતું. જેમાં મુખ્ય વક્તા તરીકે ડો. કમલેશ ઉપાધ્યાય સાહેબ પ્રાધ્યાપક અને ડીન, મેડિસિન વિભાગ, બી જે મેડીકલ કોલેજ અને સિવિલ હોસ્પિટલ, અમદાવાદ દ્વારા વર્તમાન પરિસ્થિતિ કોવીડ-૧૯ કોરોના સમયમાં વેક્સિન (રસીકરણ) અને જાગૃતતા જ કોરોના સામે જંગ જીતી શકે તેમ છે. કોરોના સમય દરમિયાન શું શું ધ્યાન રાખવું જોઈએ, કઈ કઈ બાબતો વિશે સમજણ કેળવવી જોઈએ. આ બધી બાબતો વિશે કાર્યક્રમમાં જોડાયેલ દરેક લોકોને સરળશૈલીમાં ખૂબ સરસ રીતે માહિતગાર કર્યા હતા અને લોકોના મુંઝવતા પ્રશ્નોનું સચોટ સમાધાન આપ્યું હતું. કાર્યક્રમના અધ્યક્ષ તરીકે માનનીય કુલપતિ પ્રો. ગોપબંધુ મિશ્ર એ પણ આ કાર્યક્રમ અંતર્ગત વેક્સિનેશન અને વિદ્યાર્થીઓના પરીક્ષાને લગતા પ્રશ્નો વિશે ખૂબ સચોટ સમાધાન આપ્યું હતું. આ ઉપરાંત માનનીય કુલસચિવ ડૉ.દશરથ જાદવ એ પણ પ્રસંગોચિત પોતાનું ઉદબોધન આપેલ હતું. સ્વાગત-પરિચય અનુસ્નાતક વિભાગ અધ્યક્ષ ડૉ. લલિતકુમાર પટેલ દ્વારા કરવામાં આવ્યું હતું. કાર્યક્રમના અંતે આચાર્ય ડૉ.નરેન્દ્રકુમાર પંડ્યાએ આભારવિધિ કરી હતી. કાર્યક્રમનું સંચાલન ડો. પંકજ કુમાર રાવલે દ્વારા કરવામાં આવ્યું હતુ. આ કાર્યક્રમમાં યુનિવર્સિટી એસી. અને ઈસી. ના સભ્યો, કેમ્પસના અધ્યાપકઓ, યુનિવર્સિટીની કોલેજોના પ્રધાનાચાર્યશ્રીઓ, અધ્યાપકઓ અને યુનિવર્સિટીના વિદ્યાર્થીઓ, ભૂતપૂર્વ વિદ્યાર્થીઓ અને અન્ય લોકો મળી કુલ ૨૦૦૦ લોકો વેબેક્ષ અને ફેસબુકના માધ્યમથી જોડાયા હતા. કાર્યક્રમના સંયોજક તરીકે પ્રોગ્રામ કો-ઓર્ડીનેટર ડૉ. જે. ડી. મુંગરા અને પ્રોગ્રામ ઓફીસર ડૉ. પંકજકુમાર રાવલે કામગીરી કરેલ હતી.






**સોમનાથ સંસ્કૃત યુનિ.માં કોવિડ રસીકરણનો માર્ગદર્શન કેમ્પ સંપન્ન**

(પ્રતિનિધિ દ્વારા)

વેરાવળ તા.૧૨


સોમનાથ સંસ્કૃત યુનિ. એન.એસ.એસ. વિભાગ દ્વારા "કોવિડ-૧૯ ના સંદર્ભમાં પરીક્ષા માર્ગદર્શન અને કોરોના રસીકરણ (વેક્સિનેશન) અંગે જાગૃતતા કાર્યક્રમનું આયોજન તા.૧૦ ના રોજ કરવામાં આવેલ જેમાં મુખ્ય વક્તા ડો.કમલેશ ઉપાધ્યાય પ્રાધ્યાપક અને ડીન, મેડિસિન વિભાગ) બી.જે.મેડીકલ કોલેજ અને સિવિલ હોસ્પિટલ, અમદાવાદ દ્વારા વર્તમાન પરિસ્થિતિ કોરોના સમયમાં વેક્સિન (રસીકરણ) અને જાગૃતતા જ કોરોના સામે જંગ જીતી શકે તેમ છે.

કોરોના સમય દરમ્યાન શું શું ધ્યાન રાખવું જોઇએ, કઇ બાબતો વિશે સમજણ કેળવવી જોઇએ તે તમામ બાબતો વિશે કાર્યક્રમમાં જોડાયેલ દરેક લોકોને સરળ શૈલીમાં માહિતગાર કર્યા હતા અને લોકોના મુંઝવતા પ્રશ્નોનું સચોટ સમાધાન આપ્યું હતું. આ કાર્યક્રમના અધ્યક્ષ તરીકે કુલપતિ પ્રો.ગોપબંધુ મિશ્ર એ પણ આ કાર્યક્રમ અંતર્ગત વેક્સિનેશન અને વિદ્યાર્થીઓના પરીક્ષાને લગતા પ્રશ્નો વિશે સચોટ સમાધાન આપ્યું હતું. આ ઉપરાંત કુલસચિવ ડો.દશરથ જાદવ એ પ્રાસંગોચિત ઉદબોધન આપેલ હતું. સ્વાગત પરિચય અનુસ્નાતક વિભાગ અધ્યક્ષ ડો.લલિતકુમાર પટેલ દ્વારા કરવામાં આવેલ અને કાર્યક્રમના અંતે આચાર્ય ડો.નરેન્દ્રકુમાર પંડ્યાએ આભારવિધિ કરી હતી. આ કાર્યક્રમનું સંચાલન ડો.પંકજ કુમાર રાવલ દ્વારા કરવામાં આવ્યું હતુ. આ કાર્યક્રમમાં યુનિવર્સિટી એસી. અને ઈસી. ના સભ્યો, કેમ્પસના અધ્યાપકો, યુનિ.ની કોલેજોના પ્રધાનાચાર્યો અધ્યાપકો અને યુનિ.ના વિદ્યાર્થીઓ, ભૂતપૂર્વ વિદ્યાર્થીઓ સહીતના લોકો મળી બે હજાર લોકો વેબેક્ષ અને ફેસબુકના માધ્યમથી જોડાયા હતા. કાર્યક્રમના સંયોજક તરીકે પ્રોગ્રામ કો-ઓર્ડીનેટર ડો.જે.ડી.મુંગરા અને પ્રોગ્રામ ઓફીસર ડો.પંકજકુમાર રાવલે કામગીરી કરેલ હોવાનું એક યાદીમાં જણાવેલ છે.




## 'लेखकेन सह मिलामः' इत्याख्यः विशिष्टः कार्यक्रमः











११.०५.२०२१ तमे दिनाङ्के सायं ४:३० तः ६:०० वादनं यावत् श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन 'लेखकेन सह मिलामः' इत्याख्यः कश्चन विशिष्टः कार्यक्रमः आयोजितः आसीत्। कार्यक्रमे अस्मिन् 'अकथितं किञ्चित्' इत्यस्य उपन्यासस्य रचनाकारः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो. गोपबन्धुमिश्रमहोदयः साहित्यरसिकेभ्यः स्वेन रचितस्य उपन्यासस्य रचनानुभूतिं कारितवान्। ततः परं सः पाठकगणेन सह संवादम् अपि कृतवान्। कार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलमहोदयः लेखकस्य कृतित्वस्य परिचयम् अकारयत्। विश्वविद्यालयस्य सर्वे मान्याः प्राध्यापकाः कार्यक्रमे उपस्थाय लेखकेन सह ग्रन्थस्य विषये संवादम् अकुर्वन्। कार्यक्रमस्य आमन्त्रकस्य विश्वविद्यालयस्य कुलसचिवस्य डॉ. दशरथजादवस्य अपि कार्यक्रमे विशेषोपस्थितिः आसीत्। संस्कृतभारत्याः पूर्णकालिकः श्रीसञ्जीवमहोदयः, प्रतिभा-आर्यामहोदया, प्रो. मयूरीभाटियामहोदया, डॉ. अमृतलालभोगायता महोदयः, सुनीलप्रधानमहोदयः, शैलेशमिश्रमहोदयः च अभ्यागतत्वेन उपस्थाय स्वाभिप्रायान् प्राकटयन्। शैलेशमिश्रमहोदयेन 'अकथितं किञ्चित्' इति ग्रन्थस्य 'शेष कथन' इति नाम्ना हिन्दीभाषया अनुवादः कृतः वर्तते। कार्यक्रमेऽस्मिन् तेन अपि ग्रन्थानुवादस्य अनुभावः प्रस्तुतः। कार्यक्रमान्ते विश्वविद्यालयसंलग्नमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या महोदयः कृतज्ञताज्ञापनम् अकरोत्। कार्यक्रमोऽयं समेषामपि साहित्यरसिकानां लाभाय विश्वविद्यालयस्य फेसबुकपृष्ठद्वारा अपि प्रसारितः आसीत्। डॉ. दीपेशविनोद कतिरा अस्य कार्यक्रमस्य संयोजकत्वं निरवहत्।

## समायोजिता पालकानाम् ऑनलाईन गोष्ठी

NAAC प्रवरसमितेः विश्वविद्यालयस्य मूल्याङ्कनाय आगमनम् उद्दिश्य याः सज्जताः क्रियन्ते तासाम् अङ्गतया १५ जून २०२१तमे दिनाङ्के सायं ४:०० वादनतः ५:०० वादनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये पठतां छात्राणां पालकानां गोष्ठी काचित् समायोजिता। गोष्ठ्यामस्यां २३ पालकाः छात्राश्च समुपस्थिताः आसन्। गोष्ठ्यारम्भे डॉ. डी. एम. मोकरिया महोदयः मङ्गलाचरणं, स्वागतं, प्रास्ताविकं च अकरोत्। ततः परं डॉ. दीपेशविनोदकतिरामहोदयेन पालकैः सह प्रश्नोत्तरी प्रवर्तिता। विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितपटेलमहोदयः अपि गोष्ठीं समागत्य मार्गदर्शनम् अकरोत्। पालकानाम् ईदृशी अग्रिमा गोष्ठी ३० जून २०२१ तमे दिनाङ्के आयोजिता वर्तते। कार्यक्रमान्ते डॉ. डी. एम् मोकरिया महोदयः समागतान् सर्वान् प्रति कृतज्ञतां प्रकटितवान्। पूर्णतामन्त्रेण अयं कार्यक्रमः समाप्तिमगात्।



## वाक्यार्थपरिषदः उद्घाटनसत्रस्य प्रथमाधिवेशनस्य च वृत्तकथनम्


श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः उद्घाटनसत्रं प्रथमाधिवेशनञ्च०५-10-2020 तमे दिनाङ्के सोमवासरे सायं 4:00 वादनतः समायोजितम् । मंगलाचरणेन प्रारभ्यमाने कार्यक्रमेऽस्मिन् सर्वादौ महानुभावानां शाब्दिकस्वागतम् एवं कार्यक्रमस्य रूपरेखाकथनं साहित्यविभागस्य सहायकाचार्यःडॉ. डी. एम. मोकरिया महोदयोऽकरोत् । सत्रेऽस्मिन् प्रसङ्गोचितमुद्बोधनम् अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारपटेलमहोदयः एवं महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या महोदयः कृतवन्तौ । अधिवेशनेऽस्मिन् वेदवेदाङ्गसङ्कायाध्यक्षचरःप्रो.देवेन्द्रनाथपाण्डेयवर्यः विधिवाक्यानां मनोवैज्ञानिकी भूमिका इति विषयमुपादाय शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवान् । कार्यक्रमस्य अध्यक्षपदं माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयेन समलङ्कृतम् । तेन अध्यक्षीयोद्बोधनेन सहैव कृत्यानाम् आयामाः इति प्रासङ्गिकविषयं स्वीकृत्य स्वकीयं शोधपत्रमपि प्रस्तुतम् । सत्रान्ते समेषां महानुभावानाम् आभारभावः व्याकरणविभागस्य सहायकाचार्या सुश्रीविदुषीबोल्लामहोदया प्रकटितवती। सत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्यया सुश्रीअपूर्वाअग्रवालमहोदयया विहितम् ।

## वाक्यार्थपरिषदः द्वितीयाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः द्वितीयाधिवेशनं 20-10-2020 तमे दिनाङ्के मंगलवासरे सायं 4:00 वादनतः समायोजितम् । मंगलाचरणेन प्रारभ्यमाने कार्यक्रमेऽस्मिन् सर्वादौ महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषीबोल्ला महोदयाऽकरोत् । सत्रेऽस्मिन् पुराणविभागस्य सहायकाचार्यः डॉ. पंकजकुमाररावलमहोदयः, ज्योतिषविभागस्य सहायकाचार्यः डॉ. रमेशचन्द्रशुक्लमहोदयः, गुजराती भाषायाः अतिथ्यध्यापकः श्री भीखाभाईसोलङ्कीमहोदयः तथा च विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितपटेलमहोदयः शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्तः । कार्यक्रमस्य अध्यक्षपदमपि डॉ. ललितपटेलमहोदयेन समलङ्कृतम् । सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं ज्योतिषविभागस्य सहायकाचार्या कु. अपूर्वा अग्रवालः अकरोत् ।

## वाक्यार्थपरिषदः तृतीयाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषदः तृतीयाधिवेशनं 05-12-2020 तमे दिनाङ्के शनिवासरे सायं 5:00 वादनतः समायोजितम् । कार्यक्रमेऽस्मिन् उपस्थितानां महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदयाकरोत् । सत्रेऽस्मिन् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो.गोपबन्धुमिश्रमहोदयस्य विशेषोपस्थितौ साहित्यविभागस्य सहायकाचार्यः डॉ. डी. एम. मोकरियामहोदयः, दर्शनविभागस्य सहायकाचार्या डॉ. उमा महेश्वरी महोदया, सङ्गणकविषयस्य प्राध्यापकः श्री आशीषः धनेशा महोदयः तथा च विश्वविद्यालयद्वारा संचालितमहाविद्यालयस्य प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्तः । कार्यक्रमस्य आध्यक्ष्यमपि माननीयः प्राचार्यः प्रो. नरेन्द्रकुमारः पण्ड्यावर्यः ऊढवान्। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत् ।







## वाक्यार्थपरिषदः चतुर्थाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १४/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डे वाक्यार्थपरिषदः चतुर्थाधिवेशनमायोजितम्। अस्याः सभायाः आध्यक्ष्यं समलङ्कृतवन्तः आसन् – वेदविभागस्य आचार्य्याः प्रो॰ देवेन्द्रनाथपाण्डेयवर्य्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन व्याकरणविभागस्य सहायकाचार्य्येण डॉ॰ दीपेशविनोदकतिरामहोदयेन 'सरलमानकसंस्कृतालेखस्य समीक्षा' इत्यमुं विषयमादाय संस्कृतभाषां व्यापकतया प्रयोक्तुम्, सरलीकर्त्तुञ्च उपायाः बोधिताः। अनन्तरं द्वितीयशोधपत्रप्रस्तोत्री आसीत् – प्रा॰ मनीषाबेन कालेवर्य्या, अनया उपन्यासस्थनायिकायाः मनोवैज्ञानिकदशायाः प्रतिपादनपुरस्सरं 'सुषमा बेटी के 'लौटना' उपन्यास में नारी अस्मिता की खोज' इति विषयः उपस्थापितः। ततः अन्तिमवक्ता आसीत् – श्रीरविन्द्रकालेवर्य्यः, विषयश्च – 'MS Word as a Research Tool' इति। पत्त्रेऽस्मिन् विषयानुक्रमणिकायाः, पादटिप्पण्याः, पत्त्रान्तटिप्पण्याः, सन्दर्भग्रन्थसूचीनाञ्च एम्॰एस्॰वर्ड माध्यमेन सरलतया निर्माणं कथं कर्त्तव्यमिति बोधितम्। अन्ते च आचार्य्यैः प्रो॰देवेन्द्रनाथपाण्डेयवर्य्यैः अध्यक्षीयोद्बोधने समेषामपि शोधपत्त्राणां सारः वैशिष्ट्यञ्च प्रत्यपादि। अधिवेशनमदः ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वाग्रवालमहोदया समचालयत्।

## वाक्यार्थपरिषद: पञ्चमाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषद: पञ्चमाधिवेशनं २८-१२-२०२० तमे दिनाङ्के सोमवासरे सायं ५:०० वादनतः समायोजितम् । कार्यक्रमे व्याकरणविभागाध्यक्षवर्याणाम् प्रो. विनोदकुमार: झा महोदयानाम् आध्यक्ष्ये शोधपत्रत्रयं पठितम् । दर्शनविभागस्य सहायकाचार्य:, डॉ. जानकीशरणाचार्य: महोदय:, साहित्यविभागस्य सहायकाचार्य: श्री जिगरभट्ट: , अतिथ्यध्यापक: श्रीराजा किशोर: ओझामहोदय: शोधपत्रमाध्यमेन स्वकीयविचारान् प्रकटितवन्त:। व्याकरणविभागाध्यक्षाः प्रो. विनोदकुमारः झा महोदया: अपि स्वकीयं शोधपत्रं पठितवन्त: । सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत् ।

## वाक्यार्थपरिषदः षष्ठाधिवेशनस्य वृत्तकथनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाः वाक्यार्थपरिषदः षष्ठाधिवेशनम् २०/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डेऽभूत्। अस्याः सभायाः अध्यक्षाः आसन् – साहित्यविभागस्य आचार्य्याः प्रो॰ अर्चनाकुमारीदुबेवर्य्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तासीत् - योगविभागस्य प्राध्यापिका सुश्रीदृष्टिबेन बारैयामहोदया। एतया 'आसनविचारः' इत्यमुं विषयमादाय आसनानां वैशिष्ट्यम्, तेषां प्रकारः, एतैः रोगाणां निवारणञ्च कथमिति सम्यग्बोधितम्। अनन्तरं द्वितीयशोधपत्रप्रस्तोता आसीत् – शारीरिकशिक्षणविभागस्य सहायकाचार्य्यः डॉ॰ जयेशमुङ्गरामहोदयः, अनेन 'રોગનું મેગાસિટી એટલે ઓબેસિટી' इति विषयमाधृत्य शरीरस्थौल्येन के के रोगाः जायन्ते, तन्निदानञ्चोद्बोधितम्। ततः अन्तिमशोधपत्त्रमासीत् सभाध्यक्षाणां प्रो॰ अर्चनाकुमारीदुबेवर्य्याणाम्। जीवनप्रबन्धाय उपयोगिनः गुणाः के, ते चैकस्मिन् भगवति हनुमति रामायणादिषु कस्मिन् प्रसङ्गे द्रष्टुं शक्नुमः इत्युपदिश्य 'जीवनप्रबन्धनस्य मूर्त्तिमान् हनुमान्' इति विषयं सुष्ठु प्रतिपादितवत्यः। अन्ते च सभाध्यक्षाः आध्यक्षीयोद्बोधने द्वयोरपि शोधपत्त्रयोः वैशिष्ट्यमवोचन्। अधिवेशनेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षाः डॉ॰ ललितपटेलवर्य्याः, वरिष्ठाचार्य्याः प्रो॰ देवेन्द्रनाथपाण्डेयमहाभागाः, सर्वेऽपि आचार्य्याः, सहाचार्य्याः, सहायकाचार्य्याः, छात्त्राश्चोपस्थिताः आसन्। एषा सभा ऑनलाईनवेबैक्समाध्यमेनापि छात्त्राणां कृते आयोजितासीत्। अस्याः सञ्चालनं ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वाग्रवालमहोदया अकार्षीत्।

## वाक्यार्थपरिषद: सप्तमाधिवेशनस्य वृत्तकथनम्


श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 16/04/2021 तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः अन्तर्जालमाध्यमेन वाक्यार्थपरिषदः सप्तमाधिवेशनमायोजितम्। अस्यां सभायां सहित्यविभागस्य आचार्या: प्रो. महेन्द्रकुमार दवेवर्याः आध्यक्ष्यम् ऊढवन्तः । सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन वेदविभागस्य सहायकाचार्य्येण श्री विपुलजादवमहोदयेन 'शुक्लयजुर्वेदे पृथिवीतत्त्वम्' इत्ययं विषयः बोधितः। अनन्तरं द्वितीयशोधपत्रवक्तृत्वेन आसीत् ज्योतिषविभागस्य सहायकाचार्य: श्री नित्यानन्द ओझा महोदयः, अनेन 'ज्योतिषशास्त्रस्यालोके यात्राविचार:' इति विषयः उपस्थापितः। ततः तृतीयवक्तृत्वेन उपस्थित: संशोधनाधिकारी डॉ. कार्तिक पंड्यावर्यः 'CAS Promotions as per the UGC Regulations 2018' इति विषयमुपादाय स्वीयं शोधपत्रं पठितवान् । अन्ते च आचार्यैः प्रो. महेन्द्रकुमार दवेवर्यैः 'महाकविश्रीरामचन्द्रसूरिरचितनलविलासे रसविमर्श:' इत्यमुं विषयं प्रतिपाद्य आध्यक्षीयोद्बोधनं विहितम्। अस्य अधिवेशनस्य सञ्चालनं व्याकरणविभागस्य सहायिकाचार्यया सुश्री विदुषीबोल्लामहोदयया विहितम्।

## वाक्यार्थपरिषदः अष्टमाधिवेशनस्य इतिवृत्तम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०५/०५/२०२१ तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः अन्तर्जालमाध्यमेन वाक्यार्थपरिषदः अष्टमाधिवेशनम् माननीयानां कुलपतिपादानां प्रो. गोपबन्धु मिश्रमहाभागानां विशेषोपस्थितौ आयोजितम् । अस्यां सभायां वेदवेदाङ्गसङ्कायस्य अध्यक्षा: डॉ. शत्रुघ्न पाणिग्राहीवर्याः आध्यक्ष्यम् ऊढवन्तः । सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्त्रीत्वेन पुराणसङ्कायस्य अध्यक्षया डॉ. आशा माढक महोदयया 'श्रीमद्भागवतपुराणे ध्रुवोपाख्यानस्य आधुनिकयुगे अध्ययनम्' इत्ययं विषयः बोधितः। अनन्तरं द्वितीयशोधपत्रवक्त्रीत्वेन आसीत् ज्योतिषविभागस्य सहायकाचार्या सुश्री अपूर्वा अग्रवाल महोदया, अनया 'लग्नभावफलविचार:' इति विषयः उपस्थापितः। ततः तृतीयवक्त्रीत्वेन उपस्थिता व्याकरणविभागस्य सहायकाचार्या सुश्री विदुषी बोल्ला महोदया ' वर्णत्वपरिष्कार:' इति विषयमुपादाय स्वीयं शोधपत्रं पठितवती । अन्ते च वेदवेदाङ्गसङ्कायस्य अध्यक्षवर्यैः डॉ. शत्रुघ्न पाणिग्राहीमहोदयैः 'वैदिकसाहित्ये इन्द्रविज्ञानम्' इत्यमुं विषयं प्रतिपाद्य अध्यक्षीयोद्बोधनं विहितम्। अस्य अधिवेशनस्य सञ्चालनं साहित्यविभागस्य सहायकाचार्यैः डॉ. डी. एम. मोकरियावर्यैः विहितम्।

# "शोधज्योतिः" इति शोधपत्रिकायाः द्वितीयाङ्कस्य लोकार्पण-कार्यक्रमः

श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन १८.०५.२०२१ तमे दिनाङ्के विश्वविद्यालयस्य "शोधज्योतिः" शोधपत्रिकायाः आभासीयः लोकार्पण-कार्यक्रमः आयोजितः। अस्य कार्यक्रमस्य अध्यक्षत्वेन माननीयः कुलपतिः प्रो. गोपबन्धु मिश्र-महोदयः आभासीय-लोकार्पणम् आध्यक्षीयम् उद्बोधनं च कृतवान्। अनन्तरं कुलसचिवः डॉ. दशरथ जादवः प्रकाशकीयम् उद्बोधनं विहितवान्। महानुभावानां स्वागतं तथा च विश्वविद्यालयस्य संशोधन-गतिविधीनां संक्षिप्तं परिचयम् अनुस्नातकभवनाध्यक्षः डॉ. ललित पटेलमहोदयः कारितवान्। प्रासङ्गिकम् उद्बोधनं व्याकरणविभागस्य आचार्यः अध्यक्षश्च प्रो. विनोद कुमार झामहोदयेन तथा च कार्यक्रमस्य सञ्चालनम् आभारज्ञापनञ्च सम्पादकान्यतमेन डॉ. जानकीशरण आचार्य महोदयेन विहितम्।




उपस्थिताः कुलपतिप्रमुखाः महानुभावाः




सम्पादकौ डॉ. जानकीशरण आचार्यः, प्रो. विनोदकुमार झा च

अस्मिन् कार्यक्रमे काशी-हिन्दु-विश्वविद्यालये संस्कृत-विभागस्य आचार्या प्रो. मनुलता शर्ममहोदया अस्य द्वितीय-अङ्कस्य उद्घाटन-कार्यक्रमे उक्तवती यत् विश्वविद्यालयस्य इयं शोधपत्रिका संशोधनस्य गुणवत्तादृष्ट्या समेषां संशोधनकर्तॄणां कृते मार्गदर्शिकारूपेण कार्यं करिष्यति। गुजरात-विश्वविद्यालये संस्कृत-विभागस्य आचार्या प्रो. मयूरीबेन भाटियामहोदया श्रेष्ठशोधलेखानां प्रकाशनाय विश्वविद्यालयं प्रति शुभेच्छां प्रकटितवती। श्रीसोमनाथ-संस्कृत-विश्वविद्यालय-सञ्चालितस्य संस्कृत-महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रपण्ड्यामहोदयः शोध-ज्योतिरिति पत्रिकायाः परामर्श-दातृ-मण्डलस्य प्रतिनिधिरूपेण प्रतिभावं प्रकटयन् शोध-ज्योतिरिति शब्दस्य सार्थकताम्, ज्ञानस्य महत्त्वविषये चिन्तनपूर्णं व्याख्यानं प्रस्तुतवान्।

कार्यक्रमस्य आयोजनम् अन्तर्जाल-(वेब-एक्स)-माध्यमेन कृतम्, यत्र सर्वेऽपि शैक्षणिक-कर्मचारिणः भागं गृहीतवन्तः। फेसबुक-माध्यमेनापि कार्यक्रमस्य जीवन्तप्रसारणं विहितम्। एतस्याः शोधपत्रिकायाः उपलब्धिः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य “ज्योतिः” इति आन्तर्जालिके सांस्थानिके जालपुटे अपि संस्थापितं विद्यते।

# संस्कृताध्ययनेन वृत्तिसम्पादनावसराः

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा अस्मिन् वर्षे गुजरातराज्यस्य प्रतिजनपदं विश्वविद्यालयस्य प्रचाराय, विश्वविद्यालयस्य परिचयप्रसाराय, विश्वविद्यालयस्य प्रवृत्तीनां जनसामान्यं प्रति आनयनाय मानितप्रतिनिधयः नियुक्ताः सन्ति। तैः अस्मिन् वर्षे प्रतिजनपदं "संस्कृताध्ययनेन वृत्तिसम्पादनावसराः" इति विषयमाश्रित्य वेबिनार कार्यक्रमाणाम् आयोजनम् अक्रियत। संस्कृताध्ययनेन केषु क्षेत्रेषु सेवावसराः सन्ति, छात्राः संस्कृतमधीत्य आध्यात्मिकवृद्ध्या सह वृत्तिक्षेत्रेऽपि किं प्राप्तुं शक्नुवन्ति, कथं च प्राप्तव्यम् इति अस्य वेबिनार कार्यक्रमस्य मुख्यो हेतुः आसीत्।

संस्कृते अधीयानस्य छात्रस्य मनसि बहवः प्रश्नाः भवन्ति, तेषां च अभिभावकाः अपि चिन्तयन्ति यत् एषः संस्कृतमधीत्य वर्तमानसमये कुत्र नियुक्तो भविष्यति किं वा करिष्यति, संस्कृते वृत्तिसम्पादनस्य अवसरास्तु मर्यादिताः सन्ति इति च तेषां भ्रान्तिः भवति। इमामेव भ्रान्तिं भङ्क्तुं विश्वविद्यालयेन अस्य वेबिनारकार्यक्रमस्य जनपदशः आयोजनम् अक्रियत। प्रतिजनपदं संयोजकत्वेन कार्यं कृतवतां, कार्यक्रमेषु च मुख्यवक्तृत्वेन उपस्थितानाम्, अध्यक्षत्वेन च उपस्थितानां सूची एवमस्ति –


| क्रमः | जनपदः | मुख्यातिथिः | मुख्यवक्ता | संयोजकः |
|---|---|---|---|---|
| १ | कर्णावती | श्रीभावनाबेन दवे | प्रो. विनोदकुमार झा | श्रीधर व्यास |
| २ | अमरेली | डॉ. कनुभाई करकर | डॉ. डाह्यालाल मोकरीया | डॉ.अमित उपाध्याय |
| ३ | आणन्द | - | डॉ. अश्विनभाई राठवा | डॉ. वसन्त पटेल |
| ४ | अरवल्ली | डॉ. दीपकभाई जोषी | डॉ. पङ्कजकुमार रावल | डॉ. संजय पण्ड्या<br>अपूर्वा अग्रवाल |
| ५ | बनासकांठा | - | | श्री किशोरभाई दवे |
| ६ | भरुच | डॉ. नितिन पटेल | डॉ. दीपेश कतिरा | डॉ.दीपक पारेख |
| ७ | भावनगरम् | श्री एम.आर.पाण्डे | प्रो. विनोदकुमार झा | श्री प्रणव राज्यगुरु |
| ८ | बोटाद | श्री मनोजकुमार उपाध्याय | डॉ. दीपेश कतिरा | - |
| ९ | छोटा उदेपुरम् | | अवशिष्टम् | |
| १० | दाहोद | | | श्री धर्मेन्द्र जोषी |
| ११ | डांग | डॉ. उत्तम गांगुर्डे | डॉ. आशा माढक | श्री भागिनाबेन,<br>प्रीति पटेल, मुकेश ठाकरडा |
| १२ | देवभूमि द्वारका | - | डॉ. बी. उमा महेश्वरी | श्री उत्तम शुक्ल |
| १३ | गांधीनगरम् | श्रीजयशंकर रावल | डॉ. बी. उमा महेश्वरी | डॉ. माधवी उपाध्याय |
| १४ | गीर सोमनाथ | श्री राजेशभाई डोडीया | श्रीविपुलभाई जादव | डॉ. मानसिंह केशोदा,<br>रामभाई बाकू, भावेशभाई सेवरा |
| १५ | जामनगरम् | डॉ. सुरभी दवे | डॉ. दीपेश कतिरा | डॉ. कोमल भट्ट, डॉ. जयेश मुंगरा |
| १६ | जुनागढ | डॉ. के.के. करकर | डॉ. डाह्यालाल मोकरीया | डॉ.विनु वाजा |
| १७ | खेडा | डॉ. हर्षदेव माधव | डॉ. जानकीशरण आचार्य | श्री पारस दवे |
| १८ | महिसागरम् | श्री नारायण माधु | श्रीजिगरभाई भट्ट | श्री अल्पेशकुमार पटेल,<br>डॉ. जयेश मुंगरा |
| १९ | महेसाणा | डॉ. सुरेशभाई चौधरी | प्रो. महेन्द्रकुमार दवे | श्री विजय विनुभाई पटेल |
| २० | मोरबी | (विशेषसहयोगः – मोरबी अपडेट्) | श्रीजिगरभाई भट्टः,<br>राधिका बरासरा | श्री मयुर शुक्ला |
| २१ | नर्मदा | प्रो. मधुकर पाडवी | डॉ. दीपेश कतिरा | प्रो.प्रकाशचन्द्र जोषी |
| २२ | नवसारी | प्रा. दक्षाबेन पटेल | डॉ. जानकीशरण आचार्य | श्री नयनाबेन नायक |
| २३ | पंचमहाल | प्रो. प्रतापसिंह चौहाण | डॉ. दीपेश कतिरा | श्री मुकेशकुमार एस. महेरा,<br>डॉ. राजेश व्यास |
| २४ | पाटण | डॉ. नरेन्द्रकुमार पण्ड्या | प्रो. महेन्द्रकुमार दवे | श्री अजितकुमार एम. भालैया |
| २५ | पोरबंदरम् | श्री पुलकित जोषी | प्रो. अर्चना दूबे | दवे जय, किशोरभाई महेता |
| २६ | राजकोट | डॉ. तुलजाशंकरः श्रीमाळी | श्रीजिगरभाई भट्टः | श्री विठ्ठलभाई वागडीया,<br>डॉ. कान्ति काथड |
| २७ | साबरकांठा | | अवशिष्टम् | |
| २८ | सुरत | - | डॉ. दीपेश कतिरा | डॉ.भरत व्यास |
| २९ | सुरेन्द्रनगरम् | डॉ. अमित मिश्रा | डॉ. पंकजकुमार रावल | डॉ.भरत कणझारिया |
| ३० | तापी | डॉ. जशुबेन परमार | डॉ. दीपेश कतिरा | प्रो.महेशभाई बारे |
| ३१ | वडोदरा | प्रो. हितेष रविया | डॉ. ललितकुमार पटेल | श्री हसमुख जादव,<br>डॉ. कार्तिक पण्ड्य |
| ३२ | वलसाड | डॉ.हंसाबेन परमार | डॉ. शत्रुघ्न पाणिग्राही | डॉ. अशोक पटेल, आस्था महेता |
| ३३ | कच्छ | डॉ. दक्षाबेन महेता | डॉ. पंकजकुमार रावल | डॉ.पंकज ठाकर, अमित गोर |

श्रीसोमनाथसंस्कृतविश्वविद्यालये साहित्य-वेद-ज्योतिष-दर्शन-पुराण-व्याकरणविषयाः पाठ्यन्ते। छात्राः एतेषु कतमं विषयमादाय अध्ययनं कृत्वा कां वृत्तिं प्राप्तुं शक्नुवन्ति इति PPT माध्यमेन सर्वे मुख्यवक्तारः सुष्ठु स्पष्टं च प्रतिपादितवन्तः। वेदाध्ययनेन पुरोहितत्वेन, धर्मगुरुरूपेण, कर्मकाण्डक्षेत्रे, वैदिकविज्ञानक्षेत्रे छात्राः वृत्तिं प्राप्तुं शक्नुवन्ति। साहित्याध्ययनेन छात्रः कविः, लेखकः, परामर्शकः, साहित्यविवेचकः च भवितुं शक्नोति। व्याकरणाध्ययनेन शुद्धिकारः, वृत्तपत्रेषु लेखकः, प्रवाचकः वा भवितुं शक्यते। दर्शनस्याध्ययनेन दार्शनिकः, मार्गदर्शकः वा भवितुं शक्यते। पुराणाध्ययनेन कथावाचकः, विचारकः, मार्गदर्शको वा भवितुं शक्यते। एवमेव सर्वेषु क्षेत्रेषु संस्कृतस्य आवश्यकता अस्त्येव, अतः यं कमपि विषयमादाय अधीतः छात्रः विज्ञानादिषु क्षेत्रेषु उपयोगी भवितुं शक्नोति।

संस्कृतनिष्ठग्रन्थानां लेखनेन अमीषादयः लेखकाः मेलुहा सदृशान् अनेकान् ग्रन्थान् विलिख्य प्रसिद्धिं प्राप्तवन्तः। तथैव भगवद्गीता प्रबन्धनं च, चाणक्यः प्रबन्धनं च, चाणक्यः राजनीतिः च, संस्कृतनिष्ठ-नामानां सूचिनिर्माणम्, गर्भसंस्कारः, गर्भसंस्कारविज्ञानम्, षोडशसंस्काराः, इत्यादिषु बहुषु विषयेषु संशोधनपूर्णान् ग्रन्थान् विलिख्य अनेके लेखकाः प्रसिद्ध्या सह वृत्तिं महत्त्वं च प्राप्तवन्तः सन्ति।

संस्कृतं सर्वासु शालासु सर्वेषु च विद्यालयोषु प्रायः भवत्येव, अतः संस्कृतमधीत्य तेषु तेषु विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु च अध्यापकत्वेन वृत्तिं प्राप्तुं शक्यते। IIT आद्यासु तकनीकिसंस्थासु अपि संस्कृतज्ञस्य आवश्यकता भवत्येव अतः संस्कृतज्ञस्य तासु संस्थासु अपि स्थानं महत्त्वपूर्णम् अस्त्येव।

भारते मातृकाणां सङ्ग्रहालयाः अनेके सन्ति, येषु संस्कृतस्य ज्ञानागारः अदृष्टः एव वर्तते। संस्कृतेन सह शारदा-ब्राह्मी-नागर्यादीनां लिपीनां ज्ञाता एतेषु मातृकासङ्ग्रहालयेषु अपि कार्यं कर्तुं शक्नोति। तेन समाजस्य आत्मनश्च विकासो भवति। संस्कृतं वक्तुं समर्थः जनः प्रवाचकत्वेन, दूरदर्शन-आकाशवाण्यादिषु वक्तृरूपेण कार्यं कर्तुं शक्नोति। एवं स्कृते सन्ति अनेके उद्योगावसराः, आवश्यकता अस्ति केवलं छात्रान् ज्ञापयितुम्, छात्रान् प्रति एताः सम्भावनाः नेतुम्, तदर्थमेव श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिजनपदं छात्राणां विकासाय, बोधाय, प्रश्ननिवारणाय अयं कायक्रमः आयोजितः। अयं कार्यक्रमः सामाजिकैः भृशं श्लाघितः इति प्रमोदस्य विषयः।









# "ऋषिप्रज्ञा" तथा "जीवन की स्मृतियाँ" इति ग्रन्थयोः लोकार्पणं तथा प्रो. देवेन्द्रनाथपाण्डेयस्य वर्धापनकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये १४-०६-२०२१ तमे दिनाङ्के अपराह्ले चतुर्वादने "ऋषिप्रज्ञा" तथा "जीवन की स्मृतियाँ" इति द्वयोः ग्रन्थयोः लोकार्पणस्य तथा प्रो. देवेन्द्रनाथपाण्डेयस्य सेवानिवृत्तिदिवसमुपलक्ष्य वर्धापनस्य कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे अध्यक्षत्वेन माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः उपस्थितः आसीत्। माननीयः कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, प्रो. देवेन्द्रनाथपाण्ड्येयः सभार्यः, अध्यापकाः कर्मचारिणः च उपस्थिताः आसन्।

कार्यक्रमस्य आरम्भे डॉ. शत्रुघ्नः पाणिग्राही वैदिकं मङ्गलाचरणम् अकरोत्, तेन सममेव महानुभावाः दीपप्रज्वालनम् अकुर्वन्। डॉ. बी. उमा महेश्वरी स्वागतभाषणं प्रास्ताविकं चाकरोत्। तदनु पुष्पगुच्छेन महानुभावानां स्वागतम् अभवत्। एवं स्वागतसपर्यां समाप्य "ऋषिप्रज्ञा" तथा "जीवन की स्मृतियाँ" इति ग्रन्थयोः लोकार्पणं महानुभावानां करकमलैः अजायत। "जीवन की स्मृतियाँ" ग्रन्थस्य सम्पादकीयम् उद्बोधनं मान्यः कुलपतिः प्रो. गोपबन्धुः मिश्रः व्यधात्। "ऋषिप्रज्ञा" ग्रन्थस्य सम्पादकीयं प्रो. देवेन्द्रनाथपाण्डेयः प्रास्तावीत्।

लोकार्पणकार्यक्रमे विहिते सति प्रो. देवेन्द्रनाथपाडेयस्य वर्धापनकार्यक्रमः आरब्धः। अत्रादौ सञ्चालकः श्रीजिगरभाई भट्टः प्रो. देवेन्द्रनाथपाण्डेयस्य अभिनन्दनपत्रम् अपठत्। मान्यः कुलपतिवर्यः कुलसचिववर्यः पुष्पगुच्छेन स्मृतिचिह्नेन राङ्कवेन च सह अभिनन्दनपत्रं प्रदाय प्रो. देवेन्द्रनाथपाण्डेयम् अभ्यनन्दयत्। अत्रावसरे प्रो. पाण्डेयस्य सहधर्मचारिण्याः पूनमवर्यायाः अपि अभिनन्दनम् अभवत्। विश्वविद्यालयस्य कुटुम्बेन प्रो. पाण्डेयवर्याय सुन्दरं रजतनिर्मितं शिवलिङ्गम् उपहारीकृतम्।

अध्यापकाः अस्मिन् अवसरे स्वहृदयस्थभावान् प्रकटितवन्तः। अनन्तरं प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः, मान्यः कुलसचिवश्च क्रमेण स्वहृद्गतान् भावान् प्रकटितवन्तः। तदनु दर्शनविभागीयः प्राध्यापकः डॉ. जानकीशरण आचार्यः अपि प्रो. पाण्डेयवर्यस्य स्वभावकथनपुरस्सरं स्वमनोगतान् भावान् प्रकटितवान्। प्रो. देवेन्द्रनाथपाण्डेयः स्वकीयानुभवानां वीथ्यां सर्वान् नीत्वा भूतकाले प्रवासम् अकारयत्। मान्यः कुलपतिः प्रो. गोपबन्धुः मिश्रः आध्यक्षीयम् उद्बोधनम् अकरोत्। तेन प्रो. पाण्डेयवर्यस्य निरामयस्य कामना कृता, सर्वदा तेषां संस्कृतसेवायां योगदानम् अभिलषितम्। अन्ते डॉ. दीपेशः कतिरा कृतज्ञताज्ञापनम् अकरोत्। कल्याणमन्त्रेण एषः कार्यक्रमः पूर्णः जातः। अन्ते सर्वेऽपि अध्यापकाः कर्मचारिणः च अल्पाहारं कृत्वा प्रस्थितवन्तः। कार्यक्रमस्य संयोजकौ डॉ. शत्रुघ्नः पाणिग्राही श्रीजिगरभाई भट्टश्च आस्ताम्। सम्पूर्णकार्यक्रमस्य सञ्चालनं श्रीजिगरभाई भट्टः अकरोत्। एवं विश्वविद्यालयेन एषः गौरवपूर्णः कार्यक्रममः समनुष्ठितः।







# प्राध्यापकानाम् उपलब्धयः गतिविधयश्च

**डॉ. ललितकुमारः पटेलः**

- शोधज्योतिः (ISSN -2350-0700) "Examples and Explications of Laukika-Nyayas in the Context of Kavyahetu" शोधपत्रम्।
- ऋषिप्रज्ञा इति स्मृतिग्रन्थे"प्राचीन नगरों में सुरक्षा व्यवस्था" शीर्षकेण शोधपत्रं प्रकाशितम्।(ISBN 979-98-84541-36-1)
- कालिदासजयन्तीमुपलक्ष्य कोङ्कणप्रान्तस्य ओनलाइन कार्यक्रमे "महाकविकालिदासस्य वैशिष्ट्यम्" विषये व्याख्यानं प्रदत्तम्।
- सरदार पटेल विश्वविद्यालयस्य साक्षात्कारसमितौ विषयनिष्णातरूपेण उपस्थितिः।

**प्रो. अर्चनाकुमारी दूबे**

- ऋषिप्रज्ञा इति स्मृतिग्रन्थे "यशोभूषण परम्परा में काव्यलक्षण" शीर्षकेण शोधपत्रं प्रकाशितम्। (ISBN 979-98-84541-36-1)

**डॉ. जानकीशरण आचार्यः**

- १९ तः २१ मई २०२१ – नवदेहलीस्थ-श्रीलालबहादूरशास्त्री-केन्द्रिय-संस्कृत-विश्वविद्यालयेन आयोजितायां "Three days Online National Workshop on Video Development & Editing" इति कार्यशालायां भागग्रहणं कृतम्।
- २३ तः २५ मई २०२१ - श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायान्तर्गतयोः "सर्वदर्शनम्, रामानुजवेदान्तः" इति पाठ्यक्रमयोः समीक्षार्थम् अभ्यासक्रमसमित्यां सदस्यरूपेण कार्यम्।
- १७.०६.२०२१ – श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य SSIP प्रकल्पस्य संयोजकत्वेन शिक्षणविभागस्य अग्रसचिवमहोदयायाः पुरतः SSIP विषयिणी प्रस्तुतिः।
- २१.०६.२०२१ – प्रथमा राष्ट्रिय-पातञ्जल-योगसूत्र-वाक्स्पर्धा-२०७८ इत्यत्र श्रीसोमनाथसंस्कृतविश्वविद्यालयपक्षतः संयोजकत्वेन कार्यम्।

<u>व्याख्यानानि -</u>

- ०७.०४.२०२१ - राष्ट्रियसंस्कृतमञ्चः इति आभासीये पटले "तर्कसङ्ग्रहे प्रत्यक्षप्रमाणम्" इति विषये व्याख्यानं प्रदत्तम्।
- ०८.०४.२०२१ - राष्ट्रियसंस्कृतमञ्चः इति आभासीये पटले "तर्कसङ्ग्रहे अनुमानप्रमाणम्" इति विषये व्याख्यानं प्रदत्तम्।
- ३१.०५.२०२१ – अद्वैत-अकादमी-द्वारा आभासीयरीत्या समायोजिते "Festival of Oneness-2021" इत्यत्र "अद्वैतवेदान्त में अखण्डाकार वृत्ति विमर्श" इति विषये व्याख्यानं प्रदत्तम्।
- १३.०६.२०२१ - व्यासायनट्रस्टपरिचालितेन महर्षिव्यासदेवराष्ट्रियप्राच्यविद्यागवेषणाकेन्द्रेण आयोजितायां शतज्ञानदीपव्याख्यानमालायां "भारतीयदर्शने मोक्षस्वरूपम्" इति विषये व्याख्यानं प्रदत्तम्।
- १५.०६.२०२१ - श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतभारती-खेडाजनपदम् इत्यनयोः संयुक्ततत्त्वाधाने समायोजिते "संस्कृतक्षेत्रे प्रगताध्ययनम् आजीविकावसराश्च" इति मार्गदर्शनकार्यक्रमे मुख्यवक्तृत्वेन मार्गदर्शनं विहितम्।
- १६.०६.२०२१ – "All About API" इति विषये राजस्थानी-ग्रन्थागारः इति प्रकाशनसंस्थया आयोजिते वेबिनार-कार्यक्रमे मुख्यवक्तृत्वेन बीजभाषणं कृतम्।
- २५.०६.२०२१ - श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतभारती-नवसारी-जनपदम् इत्यनयोः संयुक्ततत्त्वाधाने समायोजिते "संस्कृतक्षेत्रे प्रगताध्ययनम् आजीविकावसराश्च" इति मार्गदर्शनकार्यक्रमे मुख्यवक्तृत्वेन मार्गदर्शनं विहितम्।
- १४.०५.२०२१ - राष्ट्रियसंस्कृतमञ्चः इति शैक्षणिकसमूहस्य गुजरातप्रान्तस्य "प्रान्तप्रभारी" इति रूपेण वर्षद्वयस्य कृते नियुक्तिः।

**प्रकाशनम् -**

- "न्यायवेदान्तदर्शनयोः साधनचतुष्टयविमर्शः" इति शोधपत्रस्य प्रकाशनम् – शोधज्योतिः (ISSN – २३५०-०७००) अङ्कः-२ (जनवरी-मार्च २०२१), प्रकाशकः-श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।
- "ऋषिप्रज्ञा" इति स्मृतिग्रन्थे "न्यायवेदान्तदर्शनयोः साधनचतुष्टयविमर्शः' शीर्षकेण शोधपत्रं प्रकाशितम्। (ISBN 979-98-84541-36-1)
- विश्वविद्यालयवार्तापत्रस्य "सोमज्योतिः" इत्यस्य सप्तविंशतितमस्य (जनवरी-मार्च २०२१) अङ्कस्य सम्पादनकार्यं कृतम्।
- विश्वविद्यालयस्य "शोधज्योतिः" इति शोधपत्रिकायाः द्वितीयाङ्के (जनवरी-दिसम्बर-२०२०) सम्पादकरूपेण कार्यं कृतम्।

**श्रीजिगरभाई भट्ट**

- शोधज्योतिः इति शोधपत्रिकायाः द्वितीये अङ्के "आधुनिकं काव्यप्रयोजनम्" शीर्षकेण शोधपत्रं प्रकाशितम्। (ISSN -2350-0700)
- श्री-गोविन्दगुरु-विश्वविद्यालयेन (गोधरा) आयोजिते पञ्चमहाकाव्यपरिचयकार्यक्रमे "शिशुपालवधस्य आदितः दशमसर्गं यावत्" व्याख्यानं (२७-५-२०२१), "शिशुपालवधस्य एकादशतः आन्तं यावत्" (२८-५-२०२१) व्याख्यानं प्रदत्तम्।
- विश्वविद्यालयवार्तापत्रस्य "सोमज्योतिः" इत्यस्य सप्तविंशतितमस्य (जनवरी-मार्च २०२१) अङ्कस्य सम्पादनकार्यं कृतम्।

**डॉ. कार्तिक पण्ड्या**

- ०२-०३.०४.२०२१ यावत् विश्वविद्यालयपरिसरे समायोजितायाः द्विदिवसात्मिकायाः NAAC समीक्षा-कार्यशालायाः संयोजकत्वं विहितम्।
- ०६-०४-२०२१ दिनाङ्के महाराजासयाजीरावविश्वविद्यालय- वडोदराद्वारा समायोजितायां आभासीय-विद्यावारिधिकार्यशालायां 'Research Aptitude: An Introduction' तथा च 'Ph.D. Regulations as per the Gazettes of India, 2016 & 2018' इत्यस्मिन् विषये तथा च ०८-०४-२०२१ दिनाङ्के 'Publication Ethics: Definition, Introduction and Importance in the light of UGC (Plagiarism) Regulations, 2018' तथा च 'Manuscriptology and N.C.C.' इत्यस्मिन् विषये व्याख्यानद्वयं प्रदत्तम् ।
- 'Myths of Indra in the Mahabharata' इति शोधपत्रस्य प्रकाशनम्। शोधज्योतिः अङ्कः-२, ISSN – 2350-0700

# श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः

राजेन्द्रभुवनमार्गः, वेरावलम्-३६२ २६६, गीरसोमनाथ-जनपदः (गुजरातम्)

दूरभाषः ०२८७६-२४४५२८/२९/३२ फेक्स – २४४४१७, वेबसाइट www.sssu.ac.in Email: sssu.veraval@gmail.com

## प्रवेश-सूचना २०२१-२२

### शुल्क-विवरणम् (प्रतिसत्रम्)

| क्रमः | अभ्यासक्रमाः | विषयाः | न्यूनतम-योग्यता | अवधिः | शुल्कम् * (Boys) | शुल्कम् * (Girls) |
|---|---|---|---|---|---|---|
| १ | आचार्यः (M.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | संस्कृतमुख्यविषयेण सह स्नातकोपाधिः | 2 Years | 1250 | 550 |
| २ | M.A. | योगः | स्नातकोपाधिः | 2 Years | 2100 | 2100 |
| | | संस्कृतम् (General Studies) | स्नातकोपाधिः | 2 Years | 1250 | 550 |
| ३ | संयुक्त-शास्त्रि-शिक्षाशास्त्री (Integrated B.A., B.Ed.) | संस्कृतम् | १२तमा कक्षा (50% सह) | 4 Years | 8050 | 5550 |
| ४ | शास्त्री (B.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | १२तमा कक्षा | 3 Years | 1250 | 650 |
| ५ | पदविका (Diploma) | योगः, ज्योतिषम्, कर्मकाण्डम्, संस्कृतशिक्षणम्, मन्दिरव्यवस्थापनम् | १२तमा कक्षा | 1 Years | 500 | 500 |

* अत्र निर्दिष्टं शुल्कं केवलम् एकस्य सत्रस्य अस्ति। * एतत् मुख्यकेन्द्रे स्वीक्रियमाणं शुल्कम् अस्ति।

* प्रतिसत्रं परीक्षाशुल्कं तथा च छात्रावासशुल्कम् एतत् अतिरिक्तं भवति।

**प्रवेशाय सम्पर्कं कुर्वन्तु-**

- **डॉ. नरेन्द्रकुमार पण्ड्या**, प्रधानाचार्यः, ९८९८५४०४०३
- **डॉ. पङ्कजकुमार रावलः**, अध्यापकः, ९८७९३२९८९८
- **श्री जयदीपसिंह परमार**, जु. क्लर्क, ७३५९५१७४००
- **डॉ. ललितकुमार पटेलः**, अध्यक्षः, ९८७९८३४०७१
- **डॉ. दीपेश कतिरा**, अध्यापकः, ९५९४३५६८५७
- **श्री करसन छात्रोडिया**, जु. क्लर्क, ९८२४९६६०२२

कार्यालयः – ०२८७६-२४४५३२/३३ Web: www.sssu.ac.in Email: sssu.veraval@gmail.com

